## लङ् लकारस्य अभ्यासः

### परस्मैपदिनः धातवः

**उदाहरणं दृष्ट्वा लकारपरिवर्तनं करोतु**

१. बालकः खादति | → बालकः अखादत् |
२. माता चलति |
३. शिशवः क्रीडन्ति |
४. नर्तकी नृत्यति |
५. अध्यापकः वदति |
६. विद्यार्थी तिष्ठति |
७. कर्मकरः स्मरति |
८. कुक्कुरः पिबति |
९. मित्रं हसति |
१०. दुर्जनः चोरयति |
११. पुरुषाः नयन्ति |
१२. पत्राणि पतन्ति |
१३. पुष्पाणि शुष्यन्ति |
१४. गायिके गायतः |
१५. सहायकाः पचन्ति |
१६. छात्राः पठन्ति |
१७. वैद्याः चिन्तयन्ति |
१८. दूतौ सूचयतः |
१९. हरिणाः धावन्ति |
२०. आरक्षकौ रक्षतः |
२१. अहं गच्छामि |
२२. वयं पश्यामः |
२३. अहं तष्ठामि |
२४. आवां लिखावः |
२५. वयं पृच्छामः |
२६. अहं पठामि |
२७. वयं दर्शयामः |
२८. आवां पाठयावः |
२९. त्वं धावसि |
३०. युवां चिन्तयथः |
३१. यूयं वपथ |
३२. आवां याचावः |
३३. अहं गणयामि |
३४. वयं वदामः |
३५. आवां रचयावः |

**उदाहरणं दृष्ट्वा लकारपरिवर्तनं करोतु**

१. पुरुषः उपविशति | → पुरुषः उपाविशत् |
२. बालिका विस्मरति | → बालिका व्यस्मरत् |
३. माता आनयति |
४. कर्मकराः प्रक्षालयन्ति |
५. अहं आह्वयामि |
६. वयं प्राप्नुमः |
७. ग्राहकः स्वीकरोति |
८. सज्जनौ उत्तिष्ठतः |
९. अभियन्तारः अङ्गीकुर्वन्ति |
१. आवां आगच्छावः |
१०. शुनकः अनुसरति |
११. वयं उपनयामः |
१२. अनुवादकाः अनुवदन्ति |
१३. अहं परिपालयामि |
१४. दुर्जनाः प्रहरन्ति |
१५. महिले निक्षिपतः |

**उदाहरणानुगुणं लकारपरिवर्तनं करोतु**

१. बालकः पुस्तकं पठति | → बालकः पुस्तकं अपठत् |
२. अहं भोजनं खादामि |
३. भवन्तः श्लोकं वदन्ति |
४. आवां फलरसं पिबावः |
५. एते घटीं पश्यन्ति |
६. अध्यापकौ पाठं पाठयतः |
७. त्वं शाकं कर्तयसि |
८. वयं कार्यालयं गच्छामः |
९. युवां स्थालिकाः स्थापयथः |
१०. सेवकौ लताः सिञ्चतः |
११. यूयं चोरं ताडयथ |
१२. चालकाः वाहनानि चालयन्ति |
१३. अहं वस्त्राणि क्षालयामि
१४. त्वं स्पर्धां पश्यसि |
१५. निर्वाहकाः यात्रापत्रं यच्छन्ति |
१६. यूयम् प्रश्नान् पृच्छथ |

### आत्मनेपदिनः धातवः

**एतानि वाक्यानि पठतु**

१. कैकेयी दशरथं वरम् अयाचत |

२. शबरी रामचन्द्रम् अवन्दत ।
३. रावणः अङ्गदं दृष्ट्वा अकम्पत ।
४. विभीषणः संस्कृतेन अभाषत ।
५. भिक्षुकः भिक्षां प्राप्य अमोदत ।

**उदाहरणानुगुणं लकारपरिवर्तनं करोतु**

१. पक्षी आकाशे डयते । → पक्षी आकाशे अडयत ।
२. गृहिणी वातायनात् वीक्षते ।
३. लतायां पुष्पाणि जायन्ते ।
४. अहं पितरं वन्दे ।
५. वयं सिंहं दृष्ट्वा पलायामहे ।
६. दरिद्राः कष्टं सहन्ते ।
७. अहं दूरवाण्या भाषे ।
८. वधूः श्वशुरात् लज्जते ।
९. ते बन्धोः वियोगेन खिद्यन्ते ।
१०. वयं संस्कृतोन्नतिं अपेक्षामहे ।
११. सज्जनाः लोकमङ्गलं कामयन्ते ।
१२. आकाशे सूर्यः प्रकाशते ।
१३. अहं शरीरेण वर्धे ।
१४. ताः उद्याने मोदन्ते ।
१५. कण्ठे हारः शोभते ।

<u>**मिश्रिताभ्यासः**</u>

**उदाहरणं दृष्ट्वा लकारपरिवर्तनं करोतु**

उदा० ह्यः सः पुस्तकम् अपठत् → अद्य सः पुस्तकं पठति ।

१. अहं बहु अधिकम् अखादम् ।
२. ताः बालिकाः सम्यक् रूपेण गृहपाठम् अकुर्वन् ।
३. ते नाटकं दृष्ट्वा गृहं गत्वा अभाषन्त ।
४. तौ बालकौ कार्यं कर्तुं न ऐच्छताम् ।
५. वयं अरण्यं गत्वा अमोदामहि ।
६. त्वं ह्यः किमर्थं भोजनं न अपचः ?
७. बालिका वानरं कदलीफलम् अददात् ।
८. विद्यार्थिनः विलम्बेन पाठशालां प्राप्नुवन् ।
९. बालकाः नूतन क्रीडां औहन्त ।
१०. आवाम् अध्यापिकां बहून् प्रश्नान् अपृच्छाव ।

**पुरुषानुसारं त्रिषु वचनेषु रूपाणि वदतु**

उदा० पठ् (प्रथम पुरुषः) _________ [अपठत्, अपठताम्, अपठन्]

१. लिख् (उत्तमपुरुषः) _________
२. यच्छ् (प्रथमपुरुषः) _________
३. गर्ज् (मध्यमपुरुषः) _________
४. क्षिप् (उ०पु०) ________
५. कम्प् (प्र०पु०) ________
६. गम् (म०पु०) ________
७. सेव् (उ०पु०) ________
८. नृत् (प्र०पु०) ________
९. वद् (म०पु०) ________
१०. तड् (उ०पु०) ________

**उचित लङ् लकार रूपेण रिक्तस्थानानि पूरयतु**

१. शिष्यः गुरुं ______ । (वन्दते) । → शिष्यः गुरुं अवन्दत ।
२. वयं ______ । (गायामः)
३. त्वम् अकारणं ______ । (लज्जसे)
४. एताः ______ । (पाठयन्ति)
५. वयं ______ । (खिद्यामहे)
६. अहं कार्यक्रमे उत्थाय ______ । (वदामि)
७. शिशवः मधुरं ______ । (भाषन्ते)
८. त्वं गृहं ______ । (गच्छसि)
९. वयं वेदनां ______ । (सहामहे)
१०. युवां ______ । (खादथः)
११. अहं यशः ______ । (लभे)
१२. तौ पत्रं ______ । (लिखतः)
१३. ताः स्वकार्यं ______ । (मन्यन्ते)
१४. ताः कदा पाठशालां ______ । (प्राप्नुवन्ति)
१५. आवां दुःखं ______ । (सहावहे)
१६. ते महिले श्लोकं ______ । (वदतः)
१७. धीराः देशरक्षार्थं ______ । (म्रियन्ते)
१८. ते आसन्दे ______ । (उपविशन्ति)
१९. वयम् एतेन ______ । (मोदामहे)
२०. यूयं गुरुं ______ । (नमथ)
२१. वयं तदेव वस्तु क्रेतुम् ______ । (इच्छामः)
२२. ताः महिलाः बहूनि पत्राणि ______ । (प्रेषयन्ति)
२३. तत्र बहवः शुनकाः ______ । (विद्यन्ते)
२४. अहं भारत देशं गत्वा मित्रेण सह ______ । (मोदे)
२५. बहु वारं परीक्षायाः लेखनेन अपि सम्यक् न ______ । (भवति)

Swarup – June 2011